## ६२. निश्चिन्ता भविष्यामि

द्विवचन प्रयोगाः

शालिनी - लतिके ! किं करोति गृहे। भवती तु सदा कार्ये मग्ना भवति।

लतिका - किं करोमि। गृहिण्याः विरामः नास्ति खलु ?

शालिनी - वदतु किं वक्तुम् इच्छति। अद्य कार्यालयस्य विरामः वा ?

लतिका - अतः एव एवम् आगतवती भवत्याः पुत्रः कथं पठति।

शालिनी - मम पुत्रः सम्यक् एव पठति। अहं तु तं पाठयामि। स्वयमेव पठति। तं पठतु इत्यपि न वदामि।

लतिका - अहो ! भाग्यशालिनी भवति ! मम पुत्रौ तु न पठतः एव। निरन्तरं क्रीडतः, अहं तु दिने न भवामि। तयोः पाठने मम समयोऽपि नास्ति। ह्यः तयोः शिक्षिका भवतां पुत्रौ अध्ययने रुचिं न दर्शयतः गृहे भवन्तः एतद्विषये समुचितं चिन्तयन्तु पठने रुचिं तयोः उत्पादयन्तु इति पत्रं प्रेषितवती- किं करोमि इति महती चिन्ता।

शालिनी - लतिके ! चिन्तां न करोतु। भवत्याः पुत्रयोः विषये अहम् उपायं वदामि।

लतिका - कः उपायः ? शीघ्रं वदतु।

शालिनी - भवती धनं दातुं सिद्धा अस्ति चेत् तौ प्रेषयतु। मम प्रतिवेशिनी उत्तमं पाठयति। परं.....

लतिका - परं... किम् ?

शालिनी - सा प्रतिमासं पाठार्थं एकस्य कृते २०० रूप्यकाणि स्वीकरोति। ये प्रथमस्थानं प्राप्नुवन्ति ते एव अधिकतया तत्र गच्छन्ति।

लतिका - धनविषये चिन्ता नास्ति। सा अङ्गीकरोति चेत् अद्य आरभ्य एव प्रेषयामि।

शालिनी - अस्तु। अहं तया सह भाषणं करिष्यामि भवतीं सूचयिष्यामि।

लतिका - धन्यवादः। अहं मम पुत्रयोः पठनविषये निश्चिन्ता भविष्यामि।